चतुर्थांश अनुक्रम

अध्याय | श्लोक | नैमिषे 1 | ओंकारे 2 | 3

1 | 2–31 | . | गणानां गणत्वे हेतु – जैगीषव्यः स्कन्दं पप्रच्छ = गणानां चरितं –
भक्तिः ज्ञानं च उभे च सर्वदा सा कारके; तत्रापि भक्तिरेव श्रेयस्करी मुक्तये.
वेदनं = ज्ञानं – तत्तु गुणानुरोधेन, सत्त्व गुणे अपि किंचित्त्वे पुण्यत्वे रमते मनः; राजसानां इष्टापूर्तेषु भवे मतिः, सात्त्विकानां
शिवार्चादौ भस्म रुद्राक्ष धारणे (त्रिपुंड्र कथादि) मतिर्भवति; तामसानां – हिंसादौ पापधर्मे मतिः
सगुण शिव ध्यानेन क्रतुलक्षजं फलं, निर्गुण शिव ध्यानात् ब्रह्म वै भवेत्.
श्रवणं = कथाभिश्रवति, मननं – गुणकीर्तनेषु

2 | 2–39 | . स्कन्दः जैगीषव्यं – शांभवानां महिमां कथयति –

(परिणते वयसि)
" शिलाद मुनिः (= वीतहव्यात्मजः); चित्रवती तस्य भार्या, शिवआराधनेन, पुत्रं प्राप्य इत्यादिकं आह – उग्रतपसा प्रीतात् पुत्रं प्राप्तुं
यज्ञे हल कर्षणे अयोनिजः पुत्रो भविष्यति – इत्युक्तः स तथा यज्ञं आतिष्ठत्, तदा कर्षणात्
~~मंत्रपाठः बाल आह – सर्वे सानंदा जाताः, ब्रह्मापि आगत्य शैलादीन् नन्दीशं इति तस्य~~

3 | 1–41 | " अपुत्रस्य निन्दा
21–29 | . | " शिलाद कृत शिवस्तुति
30–41 | . | " ब्रह्मा आगत्य तस्य नाम शैलादी तथा (नंदीश)

" तदा कर्षणात् – मंत्रपाठं बालं प्राप्य सर्वे प्रसन्ना, देवाश्च आनंदिताः – ब्रह्मा आगत्य तस्य नाम शैलादी तथा
4 | 1 – | . | नंदीश इति चक्रे – नंदीशः ववृधे यदा तथा तस्य पिता शिवाचारे नियोज्य, गुरौ स्थाप्य वेदान् अध्यापयत्.
नंदी गुरुकुलेऽपि पुष्प फलादिभिः सहध्यायीभिः सह शिवं पूजयति स्म.
33–34 | . | " , नंदिकेश कृत शिव स्तुतिः
" अधीत्य गुरुदक्षिणां दत्वा गृहागतं नंदिनं तस्य पिता विवाहं कर्तुमुद्यतः, तदा शिव प्रसाद लाभार्थं शिवाराधनं
35–42 | . | " तपः कर्तुं, स्वपितरौ सन्तोष्य, कुटीं कृत्वा, तपस्तताप –
(अतिसंवलि)
5 | 1–28 | . | . नंदी उग्रं तपस्तताप – शिवः प्रसन्नः वरं दातुमुद्यतः – नंदी स्तौति
11–28
नंदिनं वरं याचितुं शिवः आह – नंदी निश्चलां भक्तिं याचयामास – तथेत्यनुमान्य शिवः अन्तर्दधे.
6 | 1–5 | . | – नंदी पुनस्तपस्तताप – शिवः तं प्रति विप्ररूपं दत्वा – लिंगार्चनं रुद्रजप रुद्राक्ष धारणादयः नंदी न ययाचे –
6–28 | – | – " " " – शिवः प्रादुर्बभौ – तं नंदी स्तौति – शिवः सारूप्यं दत्वा तं गाणपत्ये अभिषेचयामास – असौ गणेश्वराणाम्
12–18
9–25 | . | – शिवः शैवाचार्यः विश्वसायाः सुतेन इत्युक्त्वा – सुयशाया पाणिग्रहणं कारयामास, कैलासं निनाय च.

२

अ० श्लो० नेमिषे ७० खंड १ २

८ १ — ४९ चण्डीश: — गर्गकुलोत्पन्न कणभद्रस्य अपुत्र:, तस्य माता सुशीला। अनन्तरं वैदर्भनृपस्य हयमेध यज्ञे होता तेन कणभद्रेण धनधान्य गाव... चंडी, चारयन् वने - गवां दुग्धेन शंकराभिषेचन पूजनं करोति स्म - तज्ज्ञात्वा कणभद्र: [सैकतलिङ्गं] वने
८ १ — वृक्षे स्थितो दृष्ट्वा क्रुद्ध: चंडीपूजितार्चा पादेन ताडयामास - तद्दृष्ट्वा चंडी कुठारेण पितु: पादौ छेदयामास।
चण्डीश कृत शिवस्तुति: [१-१०] शिव: प्रादुर्भूय, तं सारूप्यं, चंडिकेश्वर नाम, गणाधिपत्यं च ददौ, तस्यापि ... रमपि जीवयित्वा, देहान्ते कैलासवासं च ददौ, ताभ्यां वंशकुलरीक्षार्थं अन्य पुत्रो याचित: - तथेति उवाच शिव:
। २८-३० ३५-४४ } . . . शिवभक्त्या, पितृहननादि अन्य पापेभ्यो पि मुक्तो भवति
। ३६, ४४ —— . . . चंडीश्वर दर्शनेन एव शिवदर्शन फलं (=नान्यथा)
९ १ — ४४ . . भृंगी — नाम महामुनि: मंदरशैलाग्रे अयुतवत्सरं उग्रं तपस्तताप - शिवदर्शनं अप्राप्य खिन्न: शिवस्य प्रदक्षिणामेव कर्तुं आकाशवाण्या बोधित:, तथैव अत्यद्भुत भ्रमरकारं प्रदक्षिणां आवर्तयन् स्तुवन् इव, तत्कृत स्तुति: -
। ३१-४४ . . भवानी हिला केवलशिवप्रदक्षिणाकरणेन भवानी तं असारयितुं [१३-१८] [२६-२९] वारयत् तदाग्रहेण तपोबलात् शिवस्यैव सर्वत्वे ज्ञानरक्तो प्रबोधयत् [३८-४०]
तत: भवानी अपि प्रसन्ना ... आह - न [४१-४८]
× १० । २-५३ . . भृंगी, भवानीमपि प्रसन्नां दृष्ट्वा शिवं स्तुवति [२-५२] - तत: स गाणपत्यं प्राप।

११ १ - ५० उपमन्यु: - तस्य पिता द्युमन्यु:, पितामहश्च अभिमन्यु बह्वृच: - तस्य माता वशिष्ठस्य भगिनी. सोऽपि धौम्याग्रज: —
तस्य माता पिष्टान्न मिश्रितं जलं दुग्धमिति कृत्वा तं पाययतिस्म. पंचवर्ष: उपमन्यु: कदाचित् वशिष्ठ मातुलं प्रति गत:, [तस्य] मातुलानी अरुन्धती
यत्र शिशुं दुग्धं अपायत्, वशिष्ठोपि तं दुग्धं अपाययत् - मातुलगृहादागते उपमन्यौ तस्य माता पूर्वप्रकारेण पिष्ट मिश्रं जलं दुग्धं पातुं
अयच्छत् - उपमन्यु: तन्निराकृत्य दुग्धमेव यथार्थं, ययाचे - तस्य तदाग्रहेण माता तं सान्त्वन: शिलोच्छवृत्ते: अकृत शिवाराधनानां कुतो दुग्धं इत्यादिकं आह - शिव: क: कुत्र कथं आराध्य: इत्यादिकं पृष्टा तेन माता शिववर्णनं चकार. स उपमन्यु: शिवसाधने उद्युक्त: तं तस्य पिता उपनीय शिवपंचाक्षरं दत्वा पूजनप्रकारेन शिक्षयित्वा [सुमास] - माता च तं आशीर्भिः [२३-२५] रक्षां अधारयि:
पिता च शिवं प्रसादयितुं तं उपदिष्टवान् [लिंगार्चनं] स्तोत्रं च स्तवनार्थं उपादिदेश - तत: स वनं गत्वा शिवपंचाक्षरं [३१-३४] जपं तप्यणो बभूव.
१२ १ - ५१ उपमन्यु: परमं उग्रं [शीतलस्थित] तपस्तताप - शिव: प्रादुर्भूत: - उपमन्युकृत शिवस्तुति: [१९-३२] [३३-४०]. शिव: सर्वा विद्या: वेदादिक प्रतिभानं, गाणपत्यं क्षीरोदपानं ददौ.

3

चतुर्थांश अनुक्रम

अ. श्लो.

13 1–42 मार्कण्डेयः – (प्रजापतेः सुतः मृकण्डुमुनि पुत्रः) तस्य माता विशालाक्षी नाम्नी । गोदावरी परिसरे कुटीरं अवस
मृकण्डुमुनि तपस्तताप – मृकण्डु कृत शिवस्तुतिः 14–16 एकदा नारदस्तत्रागत्य नहुकथानकं कृत्वा – मृकण्डु मुनाच – आशिन्वर्षे तव सुतः
भूयात्, तस्य च षोडशाब्दिक आयुः परं त्वं शिवाराधनं तेन स शिवः तस्य मृत्युं नाशयिष्यति । तथैव तस्य पुत्रो जातः तं स शिवाचा
रे नियोजयत् उपनीय पंचाक्षरं ददौ – स मार्कण्डेयोऽपि शिवाचारपरायणः अभूत् वेदादिकं च सम्यग् गृहीतवान् शिवं स्तौति 38–51
तं मार्कण्डेयं शिवाचारनिपुणं ऊनषोडशवर्षिकं दृष्ट्वा पितरौ दुःखितौ जातौ – तदा मार्कण्डेयः तयोः संभाषणेन भेदं ज्ञातवान्.
मार्कण्डेयः सर्वं श्रुत्वा – शंकराराधनार्थं तपः कर्तुं निश्चित्य – पितरौ च सन्तोष्य, कालंजरं तपसे जगाम, तत्र त्रिकालं शिवार्चनपरः
14 1–46 बभूव — तस्य च अन्तिमादिने तं शिवं पूजयन्तं प्रति कालः आजगाम । तं मार्कण्डेयं प्रति स्वपाशान् मोचयत् – मार्कण्डेयः तद्दृष्ट्वा
लिंगमालिंग्य शिवं स्तौति 20–26 । ततः शिवः तल्लिंगात् प्रादुर्भूय यमं पदाहरत् शूलेन च तं व्यसुमातनोत् – ततो देवाः तत्र शिवं
पुष्पवृष्टिं कृत्वा स्तुवन्ति 35–37 । शिवश्च मार्कण्डेयं प्रणतं माभैः इत्युक्त्वा आश्वास्य तं गाणपत्यं दत्वा, तं कल्पान्तेऽपि अविनाशि

2

त्वं ददौ । मार्कण्डेयः शिवं स्तौति 42–46

देवा यमाय अनुग्रहीतुं शिवं स्तुवन्ति । शिवप्रसन्नः यमं उज्जीवयामास – शिवं कालः स्तौति 16–22 : शिवः यमं शिवपूजनं शिक्षयति 24–38
× 15 1–38 शिवः यमं क्षेत्रवासिनामपि संमानयितुं शिक्षयति 1–10 । शिवपूजकान् अहं मुक्तिं ददे तेऽपि त्वया सदा वर्जनीयाः. 11–31
16 1–21 " " दण्डनीयान् कथयति.
17 4–17
" 18–24 यमः शिवं स्तौति 18–24, सर्वे निजनिजस्थानं गताः । मार्कण्डेयः अपि स्वपितरौ प्रतिगत्वा, विवाह्य, शिवार्चनरतः, सर्वलोकसंचारी बभूव.

18 1–4 गौतमः कुशावर्ते वसन् – तस्य रूपवती भार्या शक्रो धर्षितवान् – तं स शशाप, अहल्यां च त्यक्त्वा, [illegible] भूधरे उवास
4– " शिवपरः तुष्टाव शिवं । शिवे वरदानोद्यते, भार्यया सह स्नातुं शुद्धये जलं, [illegible] गृहे सिद्ध मन्त्र [illegible]
प्रार्थये – शिवः स्वजटातः गौतमाय गंगां प्रससर्ज । सिंहस्थे गुरौ माघे तस्यां स्नाने [illegible]
[illegible] सर्व देवास्तथा ब्राह्मणाः तच्छ्रुत्वा, तत्र गत्वा [illegible]

चतुर्थांश अनुक्रमः

अ. श्लो. पृ.

वर्षे गौतमस्याश्रमे स्थिताः —

१९ १–२९ " वृष्टौ जातायां, स्वाश्रमान् गन्तुं मुच्यतां विप्रान् — विनयेन गौतमः धनुमासं यावत् महेश्वरपूजनेन, शांभवान् भाजिते नच कोटिकृत

त्वात् तान् मासमात्रं वसतु प्रार्थयामास — पाश्चात्य बुद्धयः कपटं कृत्वा, गां कृशां रचयित्वा गौतमस्य शालिक्षेत्रे अचारयन्त.

गौतमस्तां गां क्षेत्रे चरन्तीं दृष्ट्वा, तृणेन तां वारयामास, सा तृणस्पर्शादेव प्राणान् मुमोच — ते विप्राः गौतमेन गौः हता

तस्मान्न संभाषितुं योग्यं इति उक्त्वा स्वदेशान् गताः —

३०–५२ " गौतमः विचार्य, ज्ञात्वा च द्विजैः कृतं दौष्ट्यं, क्रोधात् तान् विप्रान् शशाप.

३१–५१

२० १–१० " अगस्तिः (= घटोद्भवः) गुरु आचार्यः — मित्रावरुणस्य पुत्रो मैत्रावरुणः, मैत्रावरुणः मेनकाऽप्सरसं दृष्ट्वा, कुंभे चस्कन्द;

तस्माज्जातः अगस्तिः (= घटोद्भवः = कुंभजः). तस्मादेव घटात् वसिष्ठो जज्ञे, तस्य पुत्रः शक्तिः (यः कल्माषपादेन निहतः)

शक्तेः पुत्रः पराशरः, पराशरात्मजो व्यासः, व्यासस्य पुत्रः शुकः — शुकं गर्भे [illegible] यतात्मेश्वरं.

११–४९ " व्यासः बदरिकाश्रमे शिवमाराधयत्, व्यासकृत शिवस्तुतिः. शिवस्तुष्टः व्यासाय शुकं पुत्रं ददौ. शुकः गर्भा

न्निसृतमात्रस्तु स्तुवन्नीशं वनं ययौ. शुककृत शिवस्तुतिः

१५–४८

२१ १–९ " अगस्तिः (= अगस्त्यः) यदा जज्ञे तदा अंगुष्ठमात्र एवासीत् — स अविमुक्तं प्राप्य, अगस्त्येश्वरं प्रतिष्ठाप्य अर्चयन् शिवं स्तौति.

(= लोपामुद्रापतिः)

१०–१७ " — देवा दैत्यैर्जिता — ते दैत्या देवान् जित्वा सागरं प्रविविशुः, ते दैत्या अदृश्या एव देवान् छिद्रेषु प्रहरन्ति — गुरुणा इव बुधा देवाः

शिवं स्तुवन्ति. शिवः देवान् आगस्तिं प्रति प्रेषितवान्. अगस्तिः देवोदितं श्रुत्वा तेषां रक्षणाय सागरं अपिबत्. संस्तुतः

११–१२

शुककृतः सागरं सृष्टवान्

१८–१९ " देवासुरैः जगतामुपकारहेतोः संप्रार्थितः, शिवाज्ञया विन्ध्योन्नतिं निवारयामास.

२२ १–६२ दधीचिः — (धुंधुमूकाख्य भार्गवमुनेः पुत्रः) उपनीतः वेदानपि पठितवान्. शर्यातिपुत्रः क्षुपः तस्य सहाध्यायी बभूव.

कदाचिद् दधीचिः क्षुपमाह — यदा सं राज्ये स्थापितो भूयाः तदा त्वं हिरण्य गोभिर्वासोभिर्धनधान्यैर्मुदान्वित पूर्णमनोरथैः

[illegible] करिष्यामि". क्षुपः उत्तरं ददौ "भवता च पुत्रं [illegible] मम तुल्यं द्विजोत्तम ॥ त्वया शासेऽहमतुलं स्फीतं जनपदं पितुः ॥ [illegible]

त्वया विप्र तत्कृतमस्य [illegible]", यदा क्षुपः राजा बभूव, तदा कदाचित् दधीचिः तं उपजगाम सत्कृतश्च. परं यदा दधीचिः

सहाध्याय काले स्ववचनं [illegible] इति उवाच. तदा क्षुपः [illegible] चकार । "अहोऽतिजस्य ते बुद्धिर्दृष्टा कष्ट महाधिनी ॥ आढ्येन न दरिद्रेण

मित्रं नास्ति [illegible] तथा [illegible] विप्रोऽश्रोत्रियो द्विजः ॥ [illegible] पश्चिमनुधिः इति [illegible] यति ॥ [illegible]

सात्वाय मदतः

चतुर्थांश अनुक्रम

अ. श्लो. नैमिषे० १ इत्युक्त्वा श्रुत्वा दधीचिः क्रुद्धः शिवमाराध्य ... तेन ... दधीचिः ... कृत्वा जगाम

२२ ४३-४९ " .. दधीचिः शिवमाराधयन् स्तौति ... काम कामान्तकस्यैव प्रसादं ... ॥ मरणं तेन

४५-४९ दधीचिः स्तौति - शिवस्तं प्रसादयाति

तत्स्तुत्या शिवापरोक्षे जाते - दधीचिः स्तौति -

२३ १-७ " " त्वमेव भक्तः सुपावनः ॥" ३ -ते माथ्य स निज केतने उवास -- दधीचिः

८-१६ यदा "गोभिर्धान्यगणैर्धनादिविभवै रम्ये गृहे भूषणैः ॥ स्वाङ्गनैः शिवलिंगपूजनरतो विप्रो ऽप्युवासाश्रमे" तदा क्षुपस्तच्छ्रुत्वा,

विष्णुचर्यालब्धं स्वभाग्यं दर्शयितुं, दधीचेराश्रमं, क्षुपराजा आजगाम, सम्पूजितः षड्रसवरं भुक्त्वापि निजास्त्रजालं निकरे ... निर्वीर्यान् चकार. ततः ... विष्णु

मुनिं दर्शयामास; दधीचिः दर्भमुष्ट्या, तदस्त्रजालं निकरं ... सर्वं अश्वान् सैनिकान् अपि निर्वीर्यान् चकार. ततः ...

३ शिवविद्यया निजभक्तं निर्वीर्यं दृष्ट्वा, स्वयं विष्णुः शार्ङ्गचक्रगदादिभि तत्राजगाम शस्त्राणि च मुनिं प्रति उत्ससर्ज. दधीचिः विष्णुं

शस्त्रविवर्जितं चकार, उवाच च तव भक्तस्य तथापि, शिवशैवार्चि धाष्ट्यं, गच्छ त्वं, तथापि सखा क्षुपः सैन्यसहितः जीवतु स्वं राज्ये च

कुरुतु. तदा सक्षुपोपि सुप्तोत्थित इव बुबुधे - मुनिं नत्वा विष्णुः क्षुपेन सह जगाम. विष्णुः क्षुपमाह - शांभवाः मया मद्भक्तैः देवैरपि

पूज्याः एतादृशं धाष्ट्यं तेषु मा कुर्थाः.

२४ १-२९ , " रिटिः (=औद्दालकः) पित्रा ताडितः नीलगिरौ गत्वा नीलेश्वरं शिवं भक्त्या सम्पूजयन् तपः तताप - शिवः तस्य दर्शनं गतः. रिटिः

स्तौति. तं शिवः गाणपत्यं ददौ पुत्रत्वेपि कल्पितवान् - नमस्कृत्य पितरौ तयो राज्ञे द धृकुमत्वं, सर्वं निवेद्य - कैलासं गत्वा

७-११ स्तौति. तं शिवः गाणपत्यं ददौ पुत्रत्वेपि कल्पितवान् ... रिटि लिंगार्चना दरो भवितुं इच्छत. शिवस्तं तथैव

शिवस्यानुचरोऽभवत्. शिवं स्तौति. शिवः प्रसन्नः सर्वान् कामान् ददौ;

१८-१९ वरं दत्वा अतिप्रियतमं तमाह सं भृंगिसखा चकार..

२५ १-५ .. कण्वः कुशाकारौ: शिवं आराधयमास - कण्वकृत शिवस्तुतिः ३-५

६-१० .. विश्वामित्रः शिवमाराध्य त्रिशंकुं स्वर्गिणं चकार, भुवनं ससर्ज. विश्वामित्रकृत शिवस्तुतिः ८-१०

११-१४ .✓ कपिलः महायोगी शैवाचार्यः शिवं स्तौति. १२-१४

१५-१७ .. दुर्वासाः महाशैवः शिवलिंगसमर्चकः शिवं स्तौति १६-१७

१८-२१ .. भृगुः शिवं समाराध्य, विष्णुं सभार्यां निधनं रतं शशाप. दैत्यसाहाय्यकरणे शिवं तुष्टाव ॥ २०-२१

६ अ. श्लो. नैमिषे १ स्कन्द-जै०

२५ २२–२४ · · सनन्दन - शिवं तुष्टाव २३–२४

२५–२८ · ·· सानन्द: अपि शिवं प्रार्थ्य गाणपत्यमवाप – तेन कृता शिवस्तुति: २६–२८

२६ १–१५ · · ब्रह्मा (=विधि:) "पूर्वमेकार्णवे घोरे पंचवक्त्रः प्रजापतिः॥ वितत्य सृष्टिमखिलां तेन गर्वेण मोहितः॥ दृष्ट्वा साश्चर्यमित्यूचे ... ब्रह्मा लोकलोचनः॥ मयेदं सृज्यते विश्वं कारणं जगतामहं॥ प्रजापतिरहं साक्षात् को समो मम सांप्रतं ॥" – इत्थं गर्वसंयुक्तब्रह्मणः शिरः चकर्त रुद्र शिवः प्राह- सोऽपि तथैव चकार. "मन्निन्दनाच्च संप्राप्तं ब्रह्मन्स्ते पश्य तत्फलं" – ब्रह्मा शिवं स्तौति – १२–१३
रुद्र द्वादशवर्षं ब्रह्महनन व्रताचरणं कर्तुमादिदेश, अविमुक्ते गतेन स्कोभविष्यसि- ब्रह्मापि मदर्चनात् मुक्तपापो भविष्यति- मद्द्रोहस्य मन्निन्दनस्य मदर्च्यैव गतिः परा-

१८–४१ · · रुद्रेण पृष्टः शिवः, निन्दन लक्षणानि वदति, तत्परिहारोऽपि.

२७ १–३६ · · ब्रह्महणव्रताचरणं रुद्रस्य: सर्वेषु देवलोकेषु स प्राप्त: तदा तत्र स्या सर्वे पलायिता. ब्धासहं (आज्ञावशात् लोकशिक्षणार्थं च) सरुद्र: विष्णुलोकं जगाम, विष्वक्सेनो द्वारपालो निवारणात् ... बभूव, विष्णुः तं तुष्टाव. तं रुद्र: भिक्षां यावत्तु रुधिरधमे तावती भिक्षां मां देहीति उवाच॥ ततो विष्णु ... वाच– "गृहाण देहमगवन् ... विशायते" तदा शरः ... शिरोङ्क्षिय तद्रक्तमपिबत्. नीरक्ते विष्णौ जाते, तमुज्जीवयदं जसा, ब्रह्मकपालमादाय, ततो गणप्रमुमोच ... वाराणसीं प्राप - कपालं यत्र पपात तद् कपालमोचनं नाम तीर्थमभवत्

३६–४६ · · मणिकर्णिकायां स्नात्वा रुद्रः विश्वेशं स्तौति, ततो वाराणसीं स्तौति ३८–४१ ४३–४६

२८ १–३५ · · ब्रह्मापि छिन्नशिरः शिवं स्तौति ३–५ - शिव रुद्रस्य ब्रह्महणव्रताचरणे विष्वक्सेन विष्णोरपि शरवेधने तस्या पिरक्तेन अर्धपूर्णकपालेऽस्थिकं दर्शयिता। शिवनिन्दाजनिताघस्य निष्कृति कारणेन विना, तदघं नित्यं वर्धते अतो ब्रह्मलोके एव लिंगपूजन कुरु इत्यादिदेश - सोऽपि द्वादशवर्षं भर्गयसह शिवार्चनपरो बभूव विधिः शिवं स्तौति – ... आगत्य २५–२६
तं मुक्तपापं कथितवान्, सत्यलोके तं प्रेषयामास भूतसर्जनाय

२९ १–३० · · इन्द्रः, विश्वरूपं मुनिं दैत्यानां कल्याणार्थं हत्वा, ब्रह्महत्यामवाप- देवैः भूमिं क्षितिं वनस्पतीन् ... एवं चतुर्षु ... विभज्य ... मानसोत्तरे ... लीनः तद् हत्यया इन्द्रः ... पापेन ... हेमवर्णे ... तीरे ... ताप.
दुर्वर्णतां ...

६

अ० श्लो० १ २ शनिप्रदोषे वृषवृषणकर: ... नंदी शुभदां ... सुरभि सुनन्दांच धेनुगणं आवाह्य धर्मवृषं उद्वाह्य उवाच – ... न किमपि अपितु स शिवह्रद त्वं ...
... समस्तोऽपि पुण्या द्विसंधे युत: स्यात्, तस्य अवभृथ स्नानैः दानैः दीनावनैः न किमपि अपितु स शिवह्रद त्वं ...
त: स्यात्.

३४ १ – ५ . . वरुण: कण्वशप्त: जलोदर रुजार्दित: ... समाराध्य मुक्तश्च रोगत: – तत्कृत स्तुति: ३ – ५

६ – १० . . आग्नि: – भृगुशापेन सर्वभक्षो भूत्वा – करुणा तरिंणि तटस्थं सोमभूधरनाथकं शिवं शरणंगतो मोचित: तत्कृत स्तुति: ८ – १०

११ – १५ . . वायु: – मतंग शापेन नीर्वीर्यो बभूव, भस्मसप्तकमंत्रेणोद्धृत्य गोतमीतटे त्र्यंबकेश्वरं मुक्तोऽभवात्. तत् कृत स्तुति: १३ – १४

१६ – २१ . . यम: माण्डुशापेन शूद्रोभूत्वा – गोकर्णेशं समाराध्य निर्मुक्त: तत्कृतस्तुति: १८ – २१

२२ – २८ . . कुबेर: देवीं कस्यचा देव्या शप्त: एकपिंगाक्षो बभूव – केदारेश्वरं आराध्य मुक्त: – तत्कृत स्तुति: २८

२९ – ३२ . . रवि: – संज्ञाभार्या सन्त्यज्य छायामनुरक्त:, भार्यात्याग पापेन निर्वीर्यो जात:, काञ्च्यां एकनाथं समाराध्येन, वत्सरं पंडवीशोभवत्
रविकृत शिव स्तुति: ३१ – ३२ ... श्रीमद्भस्मभानाथे शिवं संपूज्य यक्ष्ममुक्तो बभूव – तत्कृतस्तुति: ३९ – ३७

३३ – ३८ . . चंद्र: अन्या: भार्या: विहाय रोहिण्यां रक्त: दक्षशाप: यक्ष्मारोगी बभूव – अत्रि ... तत्कृतस्तुति: ३९ – ४०

३९ – ४२ . . ईशान: कालहस्तीशं शिवं समाराध्य ... अधिपो जात: तत्कृतस्तुति:

३५ १ – ४ . . विश्ववसु गंधर्व:, गायवंधु:, सवन्धु:, नारद:, पर्वत:, हाहाहूहू गन्धर्वा: चित्रकूटेश्वरं शिवं गानेन आराध्य गायनाचार्या: बभूवु: तद्गानं ३ – ४

४ – ६ . . वसवो ब्रह्मणा शप्ता:, गोपर्वतेश्वरं आराध्य शापमुक्ता: तत्कृतस्तुति: ५ – ६

७ – ९ . . तण्डु: गणवर्य: शिव पद्कमले – अन्तरंगण: पापपर्वत वरे न बिभेति – तत्स्तुति: ९

१० – ११ . . अश्विनौ – भिषक्त्वात् दैवे निरस्तौ – श्रीकण्ठेशं समाराध्य सोमभागिनौ बभूवतु: तत्कृत स्तुति: ११

१२ – १३ . . मरुत: – इन्द्रेण निकृता:, तृणज्योतिं शिवं स्तुत्वा, इन्द्रेण सोमभागं आपु: तत्कृत स्तुति: १३

१४ – १६ . . आदित्या द्वादश: – शिवं आराध्य दीप्ततनव: बभूवु:. तत्कृत स्तुति: – १६

१८ – २२ . . रुद्रा: एकादश: – शिवं समाराध्य, सारूप्यमापन्ना: " " २१ – २२

२३ – २८ . . पितर: – ... सिजेषु ...

२५ – ३३ . . { ग्रहा: ... तेशिवं ... " } ३० – ३३
मनव: चतुर्दश: " " "

३३ – ३९ . सर्वे: कथयन्ति शिवं त्रिवाराधनतो भुक्तिं मुक्तिं च भजते . ३७ – ३९

अ. श्लो. चतुर्थांशे अनुक्रमः

२९ २१–२८ इन्द्रः शिवं तुष्टाव। शिवप्रसन्नः प्रसादो भूत्वा पापात् निर्मुक्तं चकार, स पुनः इन्द्रराज्यं प्राप।

३० १–३६ विष्णुः जगतां रक्षणाय उत्तमं शस्त्रं आप्तुं, बहुक्षेत्राणि दृष्ट्वा, तेजिनी विपिने सह्याद्रिजा तीरे तेजिनीश्वर
स आराधनं, बहुउत्तम प्रकारैः पूजनं चकार –
मुनयः तत्प्रकारं पूजनस्य दृष्ट्वा, त्वं सर्वपूज्योपि प्रसन्, किं तवापि महादेवः परमेश्वर पूज्योऽस्ति? विष्णुः
तान् शिवस्य सर्वश्रेष्ठत्वं कारणकारणत्वं ब्रह्मविष्ण्वादिजनकत्वं वर्णयति, अन्यदेवपूजनं भ्रमतः एव
२० – ३४

३१ १–२८ एवमुक्त्वा विष्णुः शिवतपं तताप शिवमर्चयन् – सहस्रनाम्ना सहस्रकमलानि शिवमर्पयन् – एकेन न्यूनेन कमलेन जातेसति,
स निजनेत्रकमलं नखाग्रतो उत्कृत्यार्पयामास – ततो शिवः प्रादुर्बभूव. तं प्रणम्य विष्णुः शिवं स्तौति. तदा शिवस्तां चक्रं दैत्यवधार्थं
१० — २२
दत्तवान्.

३२ १– भगीरथो राजा – सागरान् उद्दिधर्षुः केदारं अयुतं वर्षं पूजयन् तताप तपः .. शिवं स्तौति. शिवे प्रादुर्भूते, वरेण छन्दितः
१०–११
भगीरथः, सगरान् उद्धर्तुं पावनं सलिलं ययाचे – शिवः त्रिपथगां गंगां विसृष्टवान्, पतन्तीं भूमण्डले, दातुमाह. तां पतन्तीं धर्तुं
भगीरथः पुनः शिवं तुष्टाव. शिवः तां जटामध्ये शतवर्षं दधार. भगीरथः पुनः शिवं तुष्टाव. ततः शिवस्तां विससर्ज. गंगा [illegible]
२४
पतन्ती – मां मा मोचय इति प्रसादयति. ततः शिवः तामाह – सागरान् प्लावयित्वा उद्धृत्य अविमुक्ते विश्वेश्वरं समासाद्य [illegible]
कं वहन्ती त्वं लोकं पावय, एकांशेन अत्रैव मम जटाजूटे वस. भगीरथेन सह गंगा सागरान् उद्धृत्य, मणिकर्णिका अन्नपूर्णा
विश्वेशांश्च नत्वा, शैवेभ्यो बन्धनं हत्वा, भगीरथः पुरवरं गतः अन्तर्दधे शंकर ययौ.



३३ १–२८ धर्मो वृषः ^मरुद्गणमुनिसंपूजिते^ गोमुकीश्वरसन्निधौ
निरयुतं वर्षाणि निराहारः तताप सम्यगाराध्य शंकरं चतुष्पादः
अयुतं वर्षाणि शिवलिंगावलोकनः निराहारः " [illegible] अपाहरः
सहस्रं वर्षाणि " त्रिपादः [illegible] अपाहरः
सहस्रं वर्षाणि " द्विपादः "
सहस्रं " " एकपादः "
तदा शिवः प्रादुर्भूतः, प्रणमन्तं स्तुवन्तं तं वीक्ष्य तन्मुखं पस्पर्श, तदा तपसा कृशोऽपि अंबुपिरिव ववर्ध, तुष्टाव च. शिवः वरेण
तं छन्दयामास. [illegible] [illegible] उद्वहने समर्थतां च धर्मः ययाचे १८–१९

४

अ०	श्लो०	भेगिषे	जै.सं.	ऋभुगीताध	
		१	२	३	ऋभुराह - गुह्यं श्रुणु - सर्व सिद्धान्त संग्रह - सर्वं अहं - (१)
१७	१-४०	,,	,,		,, "श्रुणु भूयः परं तत्त्वं सद्यो मोक्षप्रदायकं - सर्वं ब्रह्मैव - (१)
१८	१-४८	,,	,,		,, "ब्रह्मानन्दं प्रवक्ष्यामि त्रिषु लोकेषु दुर्लभं॥ यस्य श्रवणमात्रेण सदा मुक्तिमवाप्नुयात्॥" (१)
१९	१-५०	,,	,,		,, "श्रुणु केवलमत्यन्तं रहस्यं परमाद्भुतं॥ इति गुह्यतरं सद्यो मोक्षप्रदमिदं सदा॥" (१)
२०	१-५७	,,	,,		,, "महारहस्यं वक्ष्यामि वेदान्तेष्वपि गोपितं॥ यस्य श्रवणमात्रेण ब्रह्मैव भवति स्वयं॥" (१)
२१	१-४८	,,	,,		,, "वक्ष्ये ब्रह्ममयं सर्वं, नास्ति सर्वं जगन्मृषा॥" (१)+(०)
२२	१-६१	,,	,,		,, "निदाघ श्रुणु वक्ष्यामि सर्वलोकेषु दुर्लभं॥" (१)
२३	१-५२	,,	,,		,, "ब्रह्माभ्यास रहस्यं च वक्ष्ये निर्णयमात्मनः॥" (२)
२४	१-२४	,,	,,		,,
	२५-२८	,,	,,		,, 'सत्संगं'
	२९-३४	,,	,,		,, दृढाभ्यासः स्वानुभवः
					,, आत्माकारं
	३५-३८	,,	,,		,, दृश्यहा
		,,	,,		
	३९-४१				,, समाधि
	४१-४४	,,	,,		,, जीवन्मुक्ति विदेहमुक्ति
	४४-	,,	,,		,, त्यागः, स्मरणं
	४६-५२	,,	,,		,, ब्रह्मैव सर्वं
	५२-५४	,,	,,		
२५	१-५५	,,	,,		,, प्रसिद्धमात्मानं वक्ष्ये - नित्य, "अहं [illegible] केवलं", कल्पनं, निश्चयः, भ्रांति (सर्वनाम्नैव ब्रह्मैव; १ - २६१; २८-४१; ४२-४५; ४५-५५)

षष्ठांश अनुक्रमः
ऋभुवे जैगीषव्य ऋभु...
१ २ ३

अ. श्लो.

९ २९–५४ " " ऋभुः, नित्यं होमं (वेदेषु दुर्लभं) कथयति । सतश्च सदा ध्येयः

५५–५६ " ✓ " स्कन्द – सारं कथयति – सर्वं इदं असत्, शिव एकत्व सत्,

ऋभुः ~~[illegible]~~, जीवन्मुक्त लक्षणं च कथयति । संकल्पाभावः सर्वं
१–३० ३१–३९

१० १–३९ " ✓ " निदाघेन ~~[illegible]~~ स्नानं स्नानमेवं, तर्पणं च, पृष्टो ऋभुः सर्वं ब्रह्मैव वदति – तदेव जीवन्मुक्त लक्षणं —

११ १–७८ " " " स्नानं ~~[illegible]~~ "अहं ब्रह्मास्मीति निश्चयः" – (२–३)

~~ब्रह्म केवलं अस्मीति~~ "अहं ब्रह्मास्मि केवलं" – (४–४०)

"जीवन्मुक्तो न संशयः" – (४१–७६)

"ईशार्चने न भव ~~[illegible]~~ भावयुक्तस्तरेत् (=भवसागरं तरेत्) (७७–७८)

१२ १–६० " ✓ " ऋभुः विदेहमुक्तिं कथयति ।

६१ – " " स्कन्दः निजमनः शिवकृपा दृष्टियुक्तं कर्तुं, शिवं विनयति ।

१३ १–५८ " " ऋभुः सारात्सारतरं परं कथयति । — "आत्मनोऽन्यं न किंचन" – (१–५८)

५९ " " सर्वजगतः कारणात्मा शिवः एव – मायया विततः

१४ १–५६ " " ऋभुराह – "शृणुष्व सर्वं ब्रह्मैव, सत्यं सत्यं शिवेशापे । निश्चयं, आत्मयोगीन्द्र, अन्यत् किंचन, किंचन ॥"

१५ १–[illegible] " " " "महारहस्यं वक्ष्यामि गुह्याद्गुह्यतरं पुनः ॥ अत्यन्तं दुर्लभं लोके – सर्वं ब्रह्मैव केवलं ॥"

१६ १–२४ " " " (जगत्सर्वं) "असदेव हि केवलं" [illegible]

२४–६७ " " " साक्षान्मोक्षं प्रदीयते – "सर्वं चिन्मात्रमेव हि" – (१)

२८
५

षष्ठांश अनुक्रम

अ.	श्लो.	नै० १	जै०सं० २	अध्भु-निदाघ ३ अध्या	
					"सच्चित्परानन्दस्वभावं सर्वदा सुखं ॥ सर्ववेदपुराणानां सारात्सारतरं", "न" २-४७, "ब्रह्मैव सर्वं" ४६-५३
२६	१-५३	"	"	"	
					सद्यो मुक्तत्वसिद्धये? (३०)
२७	१-३१	"	"	"	अध्युवाह– "सत्यं ज्ञानानन्दमनामयं" (१),
					"ब्रह्मैवाहं चिदेवाहं निर्मलोऽहं निरन्तरं ॥ शुद्धस्वरूप एवाहं नित्यरूपोऽस्म्यहं ॥"
२८	१-२७	"	"	"	" "अत्यन्तं तन्मयं वक्ष्ये दुर्लभं योगिनामपि ॥ वेदशास्त्रेषु देवेषु रहस्यमतिदुर्लभं ॥ परं ब्रह्म
२९	१-६०	"	"	"	सर्वात्मा सच्चिदानन्दविग्रहः ॥ सर्वात्मा परमात्मा हि तन्मयो भव सर्वदा ॥"
					सकृच्छ्रवणमात्रेण ब्रह्मभावं परं लभेत् ॥१॥
३०	१-४४	"	"	"	" "वक्ष्ये परं ब्रह्ममात्रं जगत्सत्याग पूर्वकं ॥ ब्रह्मणोऽन्यं न विद्यते ॥" (२)
					ब्रह्म ब्रह्म परमात्रं निर्गुणं नित्यनिर्मलं शाश्वतं सममत्यन्तं,
					"वक्ष्ये रहस्यमत्यन्तं साक्षाद्ब्रह्म प्रकाशकं ॥ सर्वोपनिषदामर्थं सर्वलोकेषु दुर्लभं ॥" (१)
३१	१-५९	"	"	"	= (चतुष्टय महावाक्यानां अर्थः)
					यस्य श्रवणमात्रेण सद्यो मुक्तो भवेन्नरः ॥" (१)
३२	१-४०	"	"	"	" "वक्ष्ये पुनरसत्यागं, ब्रह्म निश्चयमेव च ॥ (सर्वा: ~~सत्ता~~ सत्ता:) "सर्वं मिथ्या न सन्देहो, ब्रह्मैवाहं न संशयः ॥" (२)
३३	१-२३	"	"	"	" "सच्चिदानन्दमात्रोऽहमनुत्पन्नमिदं जगत्" ॥ (१)
					"एकेन श्रवणेनैव ~~केवल्यं~~ परमश्नुते ॥" (१)
३४	१-२	"	"	"	" "शृणुष्व ब्रह्मविज्ञाने अद्भुतं अतिदुर्लभं ॥ (चतुःषष्टिक दृष्टान्तेः [जगतः] असम्भवता दर्शयति.) "नित्यानन्दमयं ब्रह्म केवलं सर्वदा स्वयं ॥" (२) (३६)
					"सर्वं नास्त्येव नास्त्येव, अहं ब्रह्मैव केवलं ॥" (७)
३५	१-४४	"	"	"	" "निदाघ शृणु गुह्यं मे सद्यो मुक्तिप्रदं नृणां ॥" (१).
					यस्य श्रवणमात्रेण सद्यो मुक्तिमवाप्नुयात् ॥" (१)
३६	१-३८	"	"	"	" "शृणु वक्ष्यामि विप्रेन्द्र सर्वं ब्रह्मैव निर्णयः ॥

२

अ. ३८ श्लो. ३८ नै. जै.क्र. ऋभुनिदाघ.

" १ " २ " " ऋभुरुवाच – "निदाघ शृणु वक्ष्यामि रहस्यं परमाद्भुतं ॥ यस्यैक श्रवणेनैव, सद्यो मोक्षमवाप्नुयात् ॥" १

३७ १-६५ " " "सर्वं चैतन्यमात्रत्वान्नान्यत् किञ्चिन्न विद्यते ॥" (२)

३८ १-६४ " " " "ऋभुरुवाच "वक्ष्ये त्वद्भुतं यद्वै कं तच्चिन्मयं मात्रकं ॥" (१), "सर्वं ब्रह्म (मात्रेति) निश्चिनु ॥" (२)

३९ १-४४ " " " "परं ब्रह्म प्रवक्ष्यामि निर्विकल्पं निरामयं ॥ तदेवाहं न सन्देहः सर्वं ब्रह्मैव केवलं ॥" (१)
"सर्वं ब्रह्मैव" (नान्यत्) ॥ "विश्वं विश्वतया विभाति हृदये मुदात्मनो - बोधतो ॥ ऽप्यज्ञानेन
निवर्तते श्रुतिशिरो वाक्यानुवृत्त्याऽपि च ॥ विश्वेशस्य समर्चनेन सुमहालिङ्गार्चना भस्म दृ (धृ) क् ॥ रुद्राक्षा
ऽमल धारणेन भगवद्ध्यानेन भात्यात्मवत् ॥" (४४)

४० १-३१ " " " "सर्वं सारात्सारतरं ततः सारतरात्तरं ॥ इदमन्तिममत्यन्तं शृणु प्रकरणं मुदा ॥" (७), "सर्वं ब्रह्मेति निश्चयं ॥" (८)
"सर्वमनः परित्यज्य अहं ब्रह्मेति भावय ॥" "असंकलित कापिले मधुहराक्षि पूज्याम्बुजे ॥ प्रभाङ्घ्रि जानिमो
त्तमो परिषिंचे यदीन्दु प्रभं ॥ तं डिण्डीर निभोत्तम महा खण्डाज्य दध्नापरं ॥ क्षीराद्ये राभिषिंच्य मुक्ति
परमानन्दं लभे शाम्भवं ॥" (३१)

४१ १-३६ " " " "अहं ब्रह्म न सन्देहो अहं ब्रह्म न संशयः ॥ अहं ब्रह्मैव नित्यात्मा अहमेव परात्परं ॥" (१)
(ऋभु.कृ ग्रंथ माहिमा समाप्तिश्च)

३७-४८ " " " निदाघो ऋषिसत्तमः – एतच्छ्रुत्वा कृतकृत्यो दृढभावमापन्नः दण्डवत्प्रणिपत्य ऋभोः स्तुवन् आत्मनिष्ठा स्व
प्रापणं च कथयति.

४२ १-२३ " " { " ऋभुराह – एतच्छ्रुतं कच्चिन्, मनसाधारितं वद्य, चित्तं कीदृक् स्थितं – वद ॥
निदाघः – तं प्रशंस्य – पूर्वमज्ञानं, कर्म इतत्वं चापि. सर्वं नष्टं ब्रह्मभावमापन्नं च. (इत्यादि).

४३ १-४२ " " निदाघः (कथयति) – आनन्दसागरे मग्नः, ब्रह्मान्यत् न किंचिदपि पश्यामि.

४४ १-२० " " " "तत्कृपया अहमेव सर्वं, न मत्तोऽन्यत् किंचिदपि भाति.

८

पष्ठांश। अनुक्रम
अ. श्लो. मै.१ जै.सं.२ ऋभु निदाघ ३

निदाघः अस्य अंशस्य माहात्म्येन [illegible] प्रशंसा पूज्यतादिकं कथयति।

४५ १-२९ " " तत् ग्रंथं श्रुत्वा गुरुपूजनं गुरुशुश्रूषा अवश्यं कार्यं। तत्पूजनेनैव ब्रह्मत्वं भाति, सर्वसिद्धयः जीवन्मुक्तिः विदेह

४६ १-२० " " " मुक्तिश्च (जीवन्मुक्त विदेहमुक्तयोः सूक्ष्म सौक्ष्म्येण लक्षणमपि)

४७ १-१८ " " ऋभुरुवाच - हे निदाघ शिवप्रसादपर्यन्तं - [illegible], दृढतया [illegible] भावनां कर्तुं उपदिशामि - "अहमेव परं ब्रह्म अहमेव सदाशिवः॥ अहमेवाहं चिन्मात्रं अहमेव हि निर्गुणः॥" (१-२) - (७)

" "द्रव्योऽस्ति चेन्न कुर्यात्तु वंचकेन गुरुं परं॥ कुंभीपाके तु घोरे तु तिष्ठत्येवाहि कल्पकान्" ॥८॥

(अथ निदाघश्चोत्थाय पुत्रदारान् प्रदत्तवान्॥ स्वशरीरं च पुत्रत्वे दत्वा सोदर पूर्वकं॥९॥ धनं धान्यं च वस्त्रादीन् दत्त्वाऽतिष्ठत्समीपतः॥ गुरोस्तु दक्षिणां दत्वा निदाघस्तुष्टवान् ऋभुः॥१०॥ सन्तुष्टोऽस्मि महाभाग तव शुश्रूषया सदा॥ ब्रह्मविज्ञानमाप्नोषि सकृतार्थो न संशयः॥११॥ ब्रह्मरूपमहं चेति निश्चयं कुरु सर्वदा॥ निश्चयाद्परो मोक्षो नास्ति नास्तीति निश्चिनु॥ "निश्चयं कारणं मोक्षो नान्यत्कारणमस्ति वै॥"

निदाघः तच्छ्रुत्वा तमपेदिरे॥१४"॥

अन्ये शुकादयोऽपि ऋभुं स्तुवन्ति। १८

४८ १-३४ " स्कन्दः जैगीषव्यं ज्ञानयोगसाधनं वक्ष्यति॥ १-३०

४९ १-४८ " " सुदर्शनाख्यानं — मगधदेशीयः उतथ्य तनयः सुदर्शन नामा, [illegible] मोक्षार्थं विष्णुपूजापरो नित्यं विष्णुक्षेत्रेषु संवसत् द्वादशाब्द। विष्णुः प्रसन्नः प्रत्यक्षीभूय, विना ज्ञानं अन्यवरं [illegible] मतो यत्प्रपः इत्युवाच - तं सुदर्शनः प्राह शांभवं ज्ञानं याचे - तदा विष्णुः स्वशिवं आराधयितुं [illegible] पुरुषं तं काशीं नीत्वा - तेन सह विश्वेशं पूज्य तौ स्तुवतः ४०-४८

५० १-५८ " " तदनन्तरं सुदर्शनः मणिकर्णिका स्नात्वा, अगस्त्यस्य प्रदक्षिणां लिंगान् अर्चयन् चचार (अन्तर्गृहस्थ लिंगनामानि), (अन्यानपि देवान् तीर्थानि [illegible] [illegible] तीर्थानि च, मुक्तिमण्डपे शतरुद्रीयं जपः, अघोरसहस्रं पञ्चाक्षरं जपः, [illegible] [illegible] आगत्य [illegible] [illegible]

2

अ.	श्लो.	नै.	
		1	ओ-स्कं ... नाम ... उपदेशमासि येन ते मुक्तिं ... भविष्यति.
५०	१८—३८	,,	बहुकालान्ते विष्णुः तमागत्य – काशीवासेन लं कृतकृत्या जातः – ... मनोहरैः शिवं तैर्नामैरर्चयेः – स सुदर्शनः वचिमं तथा कृत्वा – स्तौति : ३३—३८
	३९–४१	,,	एवमुक्वन्तं विष्णुस्तमुवाच – आमरणं त्वं अत्रैव स्थित्वा मोक्षं प्राप्स्यसि . ... साधनानी पृच्छति . इदं शिवपूजासमारम्भ ५६
	४२–६३	,,	विष्णुः सुदर्शनं शिव महिमानं कथयति, मासिमासि शिवार्चनफलं – अन्या ... ५०—५२
			नफलं — सुदर्शनोऽपि अन्ते मुक्तिं प्राप.
	६४–६८	,,	जैगीषव्यः स्कंदं सहस्रनामानि पृच्छति. – स्कन्दः सप्तमोऽध्या तस्य व्याख्यानं, आनन्दवन महिमा,
	६९–७०	,,	स्कन्द षडंश महिमा कथयति
	७१–७२	सूतस्तेपि —	,, " "

पंचमात्रा अनुक्रम

अ.	श्लो.	मैमिषे १	शिवपुराण २	
२०	१–५२	"	"	वैद्यनाथः — वनखंडीक्षेत्रे, भवरोगहर नामतीर्थे — भक्तभक्तः (भक्तप्रियः), कामार्थीजनकामाना पूरकः — कथा — भिल्लुराट् मेधावी जनो नाम, स्वपत्न्या भिल्लैः सहितः समर्थः पराक्रमी, सदा मृगयादि हिंसा परः, नित्यं उत्तमं मांसं आदाय, भार्यया सह भवरोग हर तीर्थे स्नात्वा, गण्डूषेण मुखपूर्णेः, वैद्यनाथमागत्य, सपादुकाभ्यां प्रेमपूर्व पूजां निःसार्य, स गण्डूषजलेन स्नापयित्वा, बिल्वपत्रैः पूजयित्वा, आनीतं मांसं विनिवेद्य, लिंगमौलिं कराभ्यां स्पृष्ट्वा महाभैरवनादेन शिवं स्तौति. तस्य तद्वाक्यं श्रुत्वा, शिवः त्रिरोंकार ध्वनियुतं प्रतिशब्दं ददाति. तद्ध्वनिं श्रुत्वा प्रणतो भिल्लुराट् स्वकं गृहं याति. एवं स नियमात् शिव पूजां करोति ४६–४७
	५३–	"	"	" ब्रह्माविष्ण्वादयो देवा अपि तत्र निशि प्रत्यहं वैद्यनाथं पूजयन्ति
	५४–५५	"	"	" "प्रातः संगव मध्याह्नकालादपि महेश्वरि ॥ सायंकाले महादेवि पूजा प्रियकरी मम ॥५४॥ तत्रापि निशि पूजा मे देवि प्रीति करी मम ॥ निशासु सितभसाभूः विमलशंगलिंगार्चकः ॥ शिवे भवति भाग्यतो मुहुरपार बिल्वार्पणैः ॥ सुपीततर केतकैः समभिपूज्य मुक्तो भवेत् ॥ नथाप्यभव शतनामपि शृणोति तत्रार्चकः ॥"
	५६–६३	,	,	" शैववर्यगणा अपि तस्य भिल्लराजस्य पर्वणि वैद्यनाथं पूजयन्ति; तैः कृता स्तुतिः. ५७–६३
	६४–१०४	,	,	" शैव वर्यैः, शिवं प्रति, भिल्लु गण्डूष जलैः, वयं न सहामो इति प्रार्थिते — तस्य भक्ति हार्द्यं प्रदर्शनाय, तत्र महानादैः सह महान् वृष्टिरेव, तत्र सर्वे शैवाः शिवालये विलीनाः — एतस्मिन् समयेऽपि सभिल्लुः सभार्यः ससहायः आगत्य तीर्थे स्नात्वा नित्यवत् सर्वं सविधि पूजादिकं च कृत्वा स्तुत्वा, प्रतिशब्दं अश्रुत्वा दुःखितः शिवं एकनेत्रहीनं दृष्ट्वा, स्वनेत्रं शरेण उत्कृत्य, शिवाय अर्पयामास, पुनरपि द्वितीयमपि नेत्रं तथैव हीनं दृष्ट्वा, स्वद्वितीय नेत्रं अपि तथैव उत्कृत्वा शिवाय अर्पयामास — शिवः ततः प्रसन्नः साक्षात् आविर्भूय, सर्वेषु पश्यत्सु, तं भिल्लुराट् मुखं स्वहस्तेन स्पृष्ट्वा तं सुचक्षुषं चकार — तद् दृष्ट्वा तस्य भिल्लुस्य भक्ति भावं अतुल्यं दृष्ट्वा परमं विस्मिताः तुष्टुवुः. शिवश्च तं भिल्लुं सभार्यं सहायं युतं कृतार्थान् चकार, तं भिल्लुराजानं सारूप्यं गणत्वं च दत्वा, विष्णोरपि शतगुणित सुख सहिते, शिवलोकेऽपि ऊर्ध्वलोके स्थानं दत्तवान्, गणपतित्वं चापि दत्तवान्.
	९७–९८	.	.	" भिल्लुराज कृत शिव स्तुतिः
२१	१–१२	.	.	त्र्यम्बकेश्वरः — त्र्यंबकगिरिः शिवः एव; "गौतमार्थं समानीता स्वमौलिस्थ जटाग्रतः ॥ पुण्या गोदावरी देवी वृद्धगंगेति विश्रुता ॥ तस्यां स्नात्वा महानद्यां दृष्ट्वा श्री त्र्यंबकेश्वरं ॥ अश्वमेध शतात्पुण्यं भविष्यति न संशयः ॥". तत्र कथा —
	१३–४२	.	.	गौतमः शिवभक्तः स्वभार्यां अहल्यां इन्द्रधर्षितां त्यक्त्वा शप्त्वा च, पुण्यानि शिवक्षेत्राणि भ्रमन्, काश्यां प्राप्य गौतमः त्रिलोचनं विश्वेश्वरं स्तौति विश्वेश्वरः गौतमं आज्ञापयामास, त्र्यंबकं गच्छ, तत्र अश्वमेधशतात्पुण्यं सिंहस्थे गोदावरीं त्र्यंबकेशं अर्चयन् प्राप्स्यसे इति. स गौतमः तदा तत्र गत्वा ...
				कथा – स ... (३०–४२)

पंचमोध्याय — अनुक्रम.

अ श्लोक

१५ ४५–६० · तान् शिवपरायणान् दृष्ट्वा शिवः प्रसन्नः, नंद्यादिगणानपि तत्र तेषां शिवभक्तिपरायणतां द्रष्टुं प्रेषितवान्. तान् गणान् दृष्ट्वा ते सर्वे लिंगपूजकाः राजा च प्रसन्नाः स्वागतं कृत्वा स राजा नंदिनं 'कुतः समागतं नन्दीश्वर अस्माकं जन्म साफल्यम्.' नंदीश्वरः तान् बहु प्रशंस्य सोमनाथपूजनमौत्कृष्ट्यं वर्णयामास —

१६ १–५० " दक्षप्रजापतेः सप्तविंशतिकन्यकाः सोमाय (चंद्राय) विवाहिताः, तासु रोहिण्यामेव प्रसन्नः, शेषाः दक्षं प्रति चंद्रस्य तन्निषेव रतिः अन्यासु नास्ति रमते इति ऊचुः; दक्षेण चंद्रः प्रबोधितो, तथापि पुनः रोहिण्यामेव रतः इति पुनः तासां शेषाः कन्याः दक्षं प्रति विगर्हितुः, ततः चंद्रं दक्षः शशाप "भव यक्ष्मगृहीतस्त्वं सद्यो निर्वीर्यकान्तः". ततः सचंद्रस्तेन शापेन अति कर्षितः, अत्रिणा बोधितः, "सोमनाथं शरणं गच्छ शापविमुक्तये". ततः चंद्रः सोमनाथं गत्वा, पयोष्ण्यां स्नात्वा, शिवाख्यम् … सोमनाथैकपरः ततापः. शिवे प्रादुर्भूते चंद्रः सहितः, रोहिण्या … मुक्तोषितः दृढव्रतानि शिवपंचाक्षरपरायणः … तं शापं मानयस्व तथा शुक्ले वर्धस्व … शिवं स्तौति. शिवः प्रसन्नः तं शापाद् विमोचयामास, परं … "अधुना सामि सोमांको भविता हि सहस्रांशि॥ चंद्रचूड इति ख्यातः संस्तुतः सुरसत्तमैः.॥"

३८–३९ वर्धयन् वर्धस्व, कृष्णे पक्षे च क्षपायिष्यसि, सोमनाथं स्तौति. एवं स्तुत्वा सगणो नंदी

५४–५५

५०–६३ " नंदिकेश्वरः पुनः सोमनाथपूजने नृपे प्रवर्तयन् स्वयमपि पयोष्ण्यां स्नात्वा सोमनाथमभ्यर्च्य, कैलासं जगाम. स बृहद्बलो राजा अपि सोमनाथार्चने दृढः बभूव. शुक्लश्लोकैः शिवं स्तौति, देवीं च स्तौति. शिवः प्रसन्नः तं विदूरथ

१६–२४ २५–२८

सावत्सरं बृहद्बलस्य शिवप्रसादनार्थं तपश्चर्या. शिवः प्रसन्नः प्रादुर्बभूव. तस्मिन् सोमनाथे लिंगे शिवे

१७ १–४८ · नामानं पुत्रं वंशधारकं अश्वमेधादिभिः शिवपूजकं, प्राप्य अकण्टकं राज्यं भुक्त्वा मां यास्यसीति वरं ददौ.

अन्तर्धानं गते, मुनिभिः स्तुतो राजा स्वराज्यं प्रति जगाम.

" सोमनाथ पूजन समयादि

४८–५१ " स बृहद्बलः पुत्रं विदूरथं, प्राप्य राज्ये स्थापयित्वा, अन्ते शिवं प्राप.

५२–५३ " विदूरथः अपि सोमनाथे परां भक्तिं प्राप्य, सौराष्ट्रे सोमनाथं साष्टांगं … तत्रैव उवास. परमसुन्दरं … सोऽपि शिवं जगाम

५३–६५ " विदूरथः … ग्रामानि दत्वा, ब्राह्मणानां च सर्वतः वर्धयामास. तस्य राज्ये न कोऽपि अशिवः आसीत्. मंदिरं च कृत्वा पूजार्थं … शिवे कृता – तस्य राज्ये न कोऽपि अशिवः आसीत्.

६६–७२ " विदूरथस्य ज्येष्ठः पुत्रो महारथः, विदूरथस्य शततमुणं …

पञ्चमांश अनुक्रमः

अ.	श्लो.	संहिता १	शिवगीता २	
२४		'	"	रामः विप्रानिव्रो पृथ्वी चकार. पितृभिः निषिद्धः निजपापनुत्यर्थं अश्वमेधेन मां पूजयितुं महेन्द्रगिरौ स्व आश्रमं कल्पयाय कृत्वा, मां मुदा गतः - "तस्याश्रमपदं देवि कृतं कृतयुगे रत्नैः ॥ चरस्थः स धनुषोऽन्तमे स्थापितो लवणाकरैः ॥ मत्वा मां स तदा रामो लभेत्रान्नितो तदाऽस्थिके"
२५	१–४९	'	"	सर्वे महर्षयः आद्य धर्मसूत्राणि कल्पसूत्राणि कृत्वाऽपि, संशयापन्नाः — गोकर्णेश्वरं - संशयोच्छेदनं ज्ञानं लब्धुं, तपांसि उग्राणि चक्रुः - तेषां दर्शने शिवे प्राप्ते मुनयः स्तुवन्ति - शिवस्तदा दक्षिणामूर्ति रूपी वयाधो स्थिते - मुनयः स्तुवन्ति. (२४–३७; ४३–४५)
	५०–१३४	'	"	ईश्वरः ज्ञानं कथयति
२६	१–९३	'	"	वामदेवः शिवात् ज्ञानं प्राप्य गोकर्णेश्वरपरस्य स्तुवन् (नृत्यन्), आत्मविज्ञाने प्राह.
२७	१–५			वामदेव स्तुतिं (सर्वोपनिषदां सारं) श्रुत्वा मुनयः सन्तुष्टा - शिवं कोलेशयन् - गोकर्णेशं ययुः
	४–८	'	"	उद्दालकोऽपि मत्तो ज्ञानं लब्ध्वा, आत्मनिष्ठो बभूव.
		"	"	
	७–५३	"		" श्रीशैलः — श्रीशैलेश्वरः + भ्रमराम्बा + कृष्णानदी + त्रिपुरान्तके लिंगं + घण्टाकर्णेश्वरः + सुधा कुण्डं + शिखरेश्वरः + विभूति कुण्डं + हाटकेश्वरः + हाटक (महा) कुण्डं. (१५–३४; ४१–४३ / १९–२१, ४१ / २३–२५ / ३७ / ४०–४५ / ४२ / ४६ / ४७ / ४८ / ४९)
	५३–७०	"	"	/ श्रियः (लक्ष्म्याः) पुत्रो अनंगः यदा शिवेन दग्धः, तदा दुःखेन तप्ता श्रीः, शतवर्षं अत्युग्रं तपः श्रीशैले तताप. शिवे प्रत्यक्षं प्रादुर्भूते, श्रीः स्तौति शिवं, शिवां च स्तौति. अनंगस्य संगतां श्री ययाचे, तदा शिवाज्ञया, शिवया स्वनेत्रकोणतः अनंग संगतां नीतः, सो अनंगः शिवं तुष्टाव. श्रीः सांगे अनंगं दृष्ट्वा हृष्टा, स्वनाम्ना तच्छैलं स्थापनार्थं ययाचे - ततः तच्छैलस्य शिवः (श्रीशैल) इतिनाम चकार. (= श्रीपर्वत) (४७–५८; ५९; ६९)
	७०–	"	"	/ देवासुरेयुद्धे स्कन्दः, तारकासुरं ~~[illegible]~~ हतवान् - तदा काव्यः (शुक्रः), "भवत्वे मोहमास्थितः" इति शशाप - तच्छाप निवृत्यर्थं श्रीशैले (मल्लिकार्जुन) ~~[illegible] श्रीशैलेश्वरं [illegible]~~). तदेव वृत्तान्तं विस्तरेण कथितुं देव्या शिवः प्रार्थितः, तथा आह (७५–)

२

अ०	श्लोक	नैमिषे १	शिवशिवा २	
२७	७५-७९	"	"	" शिवः शुक्रशापादिकं विस्तरशः कथयन् आह - पुर पद्मा द्वयामृतार का दीन - शस्त्रास्त्रैः शक्तिभिर्घोरैः स्कन्देन यदा हतवान्, तदा तान् स्वशिष्यान् हतान् दृष्ट्वा - काव्यः (= शुक्रः) दृष्ट्वातिकोपतः, षण्मुखं शशाप - "मोहयुक्तोभव बुद्धि जिह्वः फणिरूपश्च सर्वेषामपि दायकः॥ स्कन्द षष्ठीपराणां त्वं साक्षात्कामप्रदोभव॥ सा तिथिस्ते प्रियतमा कृत्तिकाभं च ते प्रियं" - इति शप्तः स्कन्दः "तत् शापे कृपाबलात् स्वीकृतवान्, लोकानामुपकाराय कुण्डलीशो भवत्सदा"
	८०-८४	"	"	") स्कन्दं शप्तं ज्ञात्वा, शिवः, काव्यं ग्रसितवान्, जठरेच अधोगतः सप्राप. तदा जठरेगतः काव्यः शिवं तुष्टाव, तदा शिवः तुष्टः, तं शुक्रद्वारा विसृष्टवान् तेन तस्य शुक्र नाम ख्यातं अभवत्. (८२-८३)
	८५-९४	"	"	") स्कन्दः श्रीशैलमागत्य श्रीशैलेश्वरं शिवं मत्वा घोरं तपः ततापः, तत्तपसा देवाः क्षुब्ध हृदया श्रीशैलेश्वरं पूजयित्वा तुष्टुवुः (८८-८९) शिवः देव्या, गणैः सह, स्कन्दपार्श्वं गत्वा करेण पस्पर्श - तदैव स्कन्दः सर्पस्वरूप रहितः स्वरूपं प्राप्य शिवं तुष्टाव. (९३-९४)
	९५-१०८	"	"	") तदा शिवः, ब्रह्मादीनां च शृण्वतां, स्कन्दाय वेदवाक्योत्थं ज्ञानं अवोचत्.
	१०९-१२२	"	"	") तदा शिवः, ब्रह्मादीनां च शृण्वतां, स्कन्दाय वेदवाक्योत्थं ज्ञानं अवोचत्. सिंहाद्रौ स्वामिपुष्करिणी तीरे यावदाभूतसं प्लवं निवासं कल्पयामास. स्कन्दः भ्रमराम्बां श्रीशैलेश्वरं शिवं च पूज्य नत्वा तत्र ययौ.
	१२३	"	"	" श्रीशैलेश्वर दर्शनेन - समस्तपुण्यफलं, स्वर्गापवर्गाप्तिः, सफला उर्वीदान स्यात् फलं, पवित्रता, मुक्तिश्च.
२८	१-७४	"	"	" सेतुबन्धः - गन्धमादन पर्वतः दक्षिणार्णवे - गन्धमादने (रामेश्वर) ईश्वरः. देवर्षिगण कृत शिवस्तुतिः (१४-१५) (रामेश्वरस्य धनुष्कोटितीर्थ)
	{१७-२१} {२९-७४}	"	"	" { धनुष्कोटितीर्थ (त्रिपुरं तत्र हत्वा शिवेन धनुःकोट्या रेखां कृता.) (१७-२१) (१) ब्रह्मा पुरा स्वकन्यां तिलोत्तमां गत्वा - तत्पापनिवृत्यर्थं (२०-२१) धनुष्कोटौ महोदधौ स्नात्वा शिवं पूज्य, पापान्मुक्तः.
	२२-२३	—	"	" (२) ईशानोऽपि ब्रह्मणः शिरश्छेदनजपापेन, धनुष्कोट्यां स्नात्वा, निष्पापो बभूव. (२२-२३)
	२४	—	"	" (३) इन्द्रः अहल्यां गत्वा, तत्पापात्, धनुष्कोट्यां स्नात्वा, पापान्मुक्तः
	२४	—	"	" (४) अग्निश्च सर्वभक्षणपापात्, तत्र स्नात्वा मुक्तः
	२५		"	" ५(५) वरुणोऽपि, मुनिशापात् महारोगं प्राप्य, धनुष्कोट्यां स्नात्वा, रोगान्मुक्तः
	२६	—	"	" ६(६) दक्षशप्तश्चन्द्रः, तत्र स्नानात्, शापान्मुक्तः
	२६-७४	—	"	" (७) स्वपत्नीवधेन भृगुः हरिं शशाप (= देवासुराणां युद्धे स्वर्गार्थ युद्धे, दैत्याः देवैः पीडिताः भृगुपत्नीं शरणं गताः. देवैः प्रार्थितो विष्णुः तां चक्रधारया अहनत्. भृगुः क्रोधवशात् हरिं शशाप "मानुषेषु हरे जन्म त्वभूया त्सुराधम॥ स्त्रीवधे निर्घृणो यस्मात्तस्मात्तेरेव पत्नी हरणं प्राप्स्यसे त्वं हरे सदा") इति शप्तः ... असत्व तत्र पत्नी वियोगजं ...

९३

१८

पंचमात्रा अनुक्रम

अ. श्लो. नैमिषे १ त्रिवर्णीका २

२८ स्वतपसो बलात् स्वपत्नीं समुज्जीव्य आश्रमं प्राप. विष्णुश्च कालेन तिर्यग्योनिगतेषु ~~[illegible]~~ भुला उन्मत्ततां प्राप्तः, शिवेन च शृङ्गेण विदारितः. स विष्णुः अयोध्यां दशरथस्य पुत्रो रामो बभूव, पित्रा विवासितो रामः सीतया लक्ष्मणेन च स वनं ययौ - तत्र रावणेन सीता हृता रामः सुग्रीवस्य शरणंगतः, अगस्तिमुनिं च रामो दृष्ट्वा, भार्याहरणं कथितं समुद्रस्तु विनयं कृतवान्. अगस्तिं विधानतः दीक्षयित्वा पंचाक्षरे मंत्रं दत्वा, गन्धमादनेश्वरं निनाय, पूजां चकार तु रामः गन्धमादनेश्वरं तुष्टाव - रावणं जेतुं रामं वरं शिवः ददौ. अगस्तिश्च महाप्रभं खड्गं, तूणीरं शरैः पूर्णं, दत्तवान्. शिवस्य कृपया सेतुं बध्वा, युधे रावणं सानुजं ससुतं हत्वा, सीतां प्राप्य, पौलस्त्यवधजब्रह्महत्याऽपनुत्तये धनुष्कोटितीर्थे ~~[illegible]~~, भ्रात्रा भार्यया वानरैश्च सह मासं स्नात्वा, पवनात्मजात् नार्मदं लिंगं समानीय, गंधमादनेश्वरात् ~~[illegible]~~ पश्चिमे, गन्धमादनपृष्ठे, ~~[illegible]~~ रामेश्वर नाम्ना स्थापयित्वा पूजयित्वा, गंधमादनस्तत्र भ्रात्रा पत्न्या वानरैश्चापि लिंगानि स्थापयित्वा - पूजयित्वा; रामः रामेश्वरं स्तौति. अगस्तिकृपया मत्प्रसादात् च, लिंगस्थापनाच्च, धनुष्कोटिस्नानात् रामेश्वरदर्शनात् पापनाशः, मुक्तिश्च भविष्यति - इति ~~[illegible]~~ शिवेनोक्तं. तदा रामः शिवं अगस्तिं नत्वा अयोध्यां गत्वा शिवतुष्ट्ये अश्वमेधेन इयाज. विष्णुः तत्र सेतुमाधवसंज्ञकः, नित्यं गंगाजलेन बिल्वैश्च शिवं पूजयति. ५८-६०

१० २९ १-१० " " अविमुक्तस्य, विश्वनाथस्य, त्रियंबकस्य, कावेर्याश्च महती महिमा सप्तमांशे वर्णयिष्यामि

११ हरिद्वार - "गंगायमुनयोः प्रभेदस्तत्र दृश्यते", ~~[illegible]~~ तत्रास्ति हरिणा पूजितं लिंगं. केदारात्पश्चिमे च शिवमध्येश्वरं अस्ति. गंगा यत्र प्रभूता. तत्रास्ति ~~[illegible]~~, विमलं सरश्च, तत्रास्ति हरिद्वारेश्वरं लिंगं यस्मात् गंगा विनिर्गता - (तद्यथा) -

२० - " , , . विष्णुः हरिद्वारे पुरा हरिद्वारेश्वराधनपरः बभूव, लक्ष्मीरपि तत्परिचर्यया हरिद्वारेश्वरार्चनसामग्रीसाधनपरा अपि हरिद्वारेश्वरार्चनपरा बभूव - तं विष्णुं तपस्यन्तं आलोकयन्तु इन्द्र ब्रह्मादयो देवा आगताः. ब्रह्मा तं विष्णुं पप्रच्छ "किं ते कार्यं समुत्पन्नं यस्मात्त्वं तपसे" इति. विष्णुस्तमाह -
शिवः सर्वश्रेष्ठः तस्मादेव मया चक्रो लब्धः, तथा चान्यैः अहं दुर्जेयः, तस्मादेव मया मनोरथा लब्धाः. अद्यच मुरो नाम असुरः अनन्तसरस्सतीरे कमला [illegible] विचिन्वंती लक्ष्मीं दृष्ट्वा स चक्रमे, तदा सा मया सचक्रेण हतः. तदा मुनयः मामवोचुः - मुरं हत्वा त्वया साधुकृतं; परं अयं शिवभक्तः, शिवभक्तस्य हनने महत्

.. ने — आदेश — अध्याय.

विष्णुब्रह्मा. भवति, तत्पाप निवृत्त्यर्थं हरिद्वारेश्वरं आराधयै, अन्यथा शिव शाप्ता भविष्यामि - अतोऽहं मत् पावनार्थं शिवमाराधयामि.

२७. श्लो॰ १ २ ३ — भवति, तत्पाप निवृत्यर्थं हरिद्वारेश्वरं स्तौति.

२८ - - " एवमुक्त्वा विष्णुः हरिद्वारेश्वरं स्तौति.

४९-५१ " " " शिवे प्रसन्ने प्रादुर्भूते, विष्णुः, वियत्पथगता गंगा, भगीरथवरात् त्वया मूर्ध्नि धृता, तां गंगामत्पावनाय देहीति ययाचे. ४९-५१

५२-६७ " " " शिवे प्रसन्ने ... तदा सा गंगा हरिद्वारेश्वरलिंगात् विनिर्गता, तस्मै शिवेन विष्णवे दत्ता. सा गंगा अविमुक्तं गता - विष्णुरपि अविमुक्तं प्राप्य विश्वेश्वरं पूज्य स्तौति. एवं स्तुत्वा विष्णुः निर्गतः.

६५-६६ गंगाप्लुतानि स्थानानि शिवः शिवया पृष्टः कथयति —

३० १-१५ हरिद्वारेश्वरात् गंगा विनिर्गता कुरुक्षेत्रं जगाम, ततो मधुवनं, ततो प्रयागं प्राप. प्रयागे सरस्वत्या संगता गंगा, यमे ... ब्रह्मा, यज्ञं कृत्वा अवभृथस्नानाय नीते, सरस्वतीं प्राह - मानससरोवराज्जाता अतो ते नाम सरस्वती भवतु, देवासुरैः प्रार्थिता ... वसामि - ततो ब्रह्मा ... नाहं वसामि भूलोके, त्वया सावित्र्या सह वसामि ... सरस्वती तमाह - तत्रैव यमुनापि आयाता, एवं गंगायमुनयोर्मध्ये अन्तर्वाहिनी ... एकांशेन भूतले वस, अपरांशेन मत्संगता भव - (भूलोके अदृश्या भवसि, पातालतलवासिनी च) ... ता शशाप ...

१६-३६ " " " प्रयागे च - सितासितजलसंगमे स्नाता जनाः ब्रह्मलोकपरायणाः, तत्र तनुं त्यक्त्वा मुक्तो भवेत्..

तत्र तीर्थे स स्थाने ... तस्य पश्चिमे प्रयागेश्वरः शिवः, विष्णुना प्रयागमाधवेनाशोकः पूजितः स्तुतश्च, तत्र तीर्थे ...

" अक्षयवटः, तस्य पश्चिमे प्रयागेश्वरः शिवः, विष्णुना प्रयागमाधवेनाशोकः पूजितः स्तुतश्च २०-२१

" सोमेशः (प्रयागेश्वरस्य उत्तरे). तं देवास्तुष्टुवुः

" प्रयागतीर्थे - तत्र माघे मकरगे रवौ मासं स्नात्वा, सर्व किल्बिषैः मुक्तो भवेत्. २३

" प्रयागतीर्थे देवैः प्रयागेश्वरं भक्त्या समर्च्य तुष्टाव, ततः स शिवेन तीर्थवरो कृतः.

" प्रयागे त्रिरात्रमुषित्वा - शतजन्मोत्थपापैः विमुच्यते. २७

" प्रयागेश्वरं समभ्यर्च्य दृष्ट्वा नत्वा स्नानाद्दानाच्च - सिद्धिस्तस्य स्यात्.

" त्रिवेणी संगमे - पापभयं नहि. तत्र विष्णुः वेणीमाधवनामतः शिवं ध्यायन् स्नातानां फलदायकः.

" " " गंगायमुनासरस्वत्यः अनिशं वहन्ति - तस्यान्तो नैव विद्यते.

" अन्तर्वेद्यां - ब्रह्मणा पुण्यमेतत् कृतं

" त्रिवेण्यां स्नात्वा, प्रयागेश्वरं वीक्ष्य, गणोत्तमो भवेत्; संपूज्य च बिल्वपत्रैः - मुक्ता भवन्ति.

" अन्यतीर्थेऽपि प्रयागं स्मृत्वा, प्रयागे स्नान फलं लभेत्.

" प्रयागे, मकरे भानौ माघे, अर्धोदये (वेदोदये) स्नात्वा - सर्वपापेभ्यो मुक्तो भवेत्.

१८ पंचक्रोश " अनुक्रम... १०–११

३७० तीर्थ... १ २ पुष्करे तु यज्ञं चकार. परंच यद्यपि तस्मिन् यज्ञे ब्राह्मणाः सन्तोषिताः, परंच शांभवोत्तमा नैव पूजिताः; तत्र शांभवाः पुष्करेशं
३५ ५६–९२ " " शरणंगताः तद्वृत्तान्तं निवेदयन्. ततश्शिवः कापालिकवेषेण तं यज्ञं जगाम– ब्राह्मणगणैः निवारितः हुंकारेण तान् भर्त्सयित्वा
५८–६०
लद्धामध्ये गत्वा ब्रह्माणं प्रति उपस्थितः शिवः "क्षुधया विवशः भोक्तुमायागतः" इत्युवाच ब्रह्मा अन्नं वासांसि च गृहाण इत्युवाच.
"सरस्वत्यां स्नात्वा, पुष्करे वरं च दृष्ट्वा, पश्चाद्भोक्ष्ये इति उक्त्वा कपालं तत्रैव स्थापयित्वा अन्तर्हितोऽभूत्– तत्रस्था ब्राह्मणाः कपालं
अभद्रं यज्ञे नेष्टं इति अपसारणाय भृत्यान् आज्ञापयामासुः. तत्कपालं अपसारितमपि पुनःपुनरपि तत्रैव समवस्थितं– कपालवस्त्रा
ते भृत्याः श्रान्ताः, परं कपालानां अन्तो नाभवत्. तदाश्चर्यं दृष्ट्वा सर्वे विस्मिताः – तदा ब्रह्मादयो देवाः शिवं तुष्टुवुः–
८६–९०
तदा शिवः तान् निजं त्रिलोचनं रूपं दर्शितवान्. तदा ते तं अस्तुवन्. तदा शिवं स्नात्वा– शिवभक्तानपि पूजयितुमाह
८३–८५ ८८–९२
मां प्रणम्य शिवभक्तान् ब्रह्मा पूजयामास.
"पश्चिमांभोनिधेस्तीरे
ज्येष्ठपुष्करे अवभृथस्नानं विधाय स्वंधाम जगाम

३६ १–६१ " "भीमेश्वरः भीमरथी नदीतटे– तत्रैव कालंजरं क्षेत्र यत्र शिवेन कालो जीर्णः. –पाण्डुरंगक्षेत्रं (=पंढरपुर?) कुणिकुंभात् (=कुम्भकोणात्) पश्चिम– ता
नः
४–१२ " (१) विष्णुः लक्ष्म्यासह विष्णुसत्रं यज्ञं चकार भीमरथ्यां अवभृथस्नानं कृत्वा विष्णुः शिवं स्तौति. विष्णुः भीमरथ्याः दक्षिणे, कुणिकुंभात् पे
६–७
मतीच्यां कालंजरे स्नात्वा प्रभाते शिवं नत्वा, पाण्डुरंगक्षेत्रे उवास.
१३–१५ " (२) पश्चिम समुद्रतीरे कुणिकुंभमहेश्वरः – तत्र कुणि नामा मुनिरवास, तस्य नाम्ना तत्क्षेत्रं प्रथितं. कुणिमुनिकृतशिवस्तुतिः क्षे
१८
१८–२२ " (३) श्वेतो नामा ऽभवद्राजा, स कालमृत्यु प्रपीडितं मृत्युंजयं शिवं बिल्वपत्रैरभ्यर्च्य स्तौति. शिवेन प्रसन्नेन कालो निगीर्णः– तेन के
२०–२१
ततः प्रभृति तत्क्षेत्रं कालंजरं इति ख्यातमभूत्. र
२२–६१ " (४) पुरा गोनन्दकः नाम गोपः विविधरंग गोवृन्दैः महिषी अजादिसहितः आस– स नित्यशः गोक्षीरैः भीमेश्वरं अभिषेचयति. भीमरथ्यास्तटे
दधिखण्डैः घृतैः दीपैः पूजयति नित्यशः. तस्य गोगणमध्यस्था नंदिनी नाम गौः. बालवत्सा गोभिः सह चरणार्थं वनं गता. दिशो गताः
चरन्ती सा भीमेश्वरं ददर्श. तस्या सद्धृदयं ज्ञातुं शिवः शार्दूलं रूपं आस्थाय जगर्ज– तदा सर्वा गावः वत्साश्च दिशो गताः. दृष्ट्वा मातरं सखीजनं च दृष्ट्वा दुः
